International Journal of Advanced Academic Studies 2020; 2(3): 497-500




**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2020; 2(3): 497-500
Received: 17-05-2020
Accepted: 22-06-2020

**डॉ. अशोक कुमार**
ग्राम + पत्रालय–फेंट, प्रखण्ड–बासोपट्टी, जिला–मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ. अशोक कुमार**
ग्राम + पत्रालय–फेंट, प्रखण्ड–बासोपट्टी, जिला–मधुबनी, बिहार, भारत,

# पुरूषार्थचतुष्टयसाधकं विवाहसंस्कारः संस्कृतञ्च

**डॉ. अशोक कुमार**

**सारांशः**
भारतीयसमाजे चतुर्णामाश्रमाणां व्यवस्था विहिता वर्तते। (1) ब्रह्मचर्याश्रमः, (2) गृहस्थाश्रमः, (3) वानप्रस्थाश्रमः, (4) संन्यासाश्रमश्च। चतुर्ष्वाश्रमेषु गृहस्थाश्रमस्य समधिकं महत्त्वं विद्यते। यतोहि, त्रयोऽन्ये आश्रमा अमुमेवं आश्रममवलम्ब्य प्रवर्तन्ते। अतः न केवलं गृहस्थाश्रमस्य परिपालनार्थम्, अन्येषां त्रयाणां गृहस्थेतराश्रमाणां निर्वाहायापि संस्कारस्यास्य आवश्यकता वरीवर्ति। ऋणत्रयस्य कल्पना वैदिकान्चारस्य पीठस्थली वर्तते।

**कूट शब्दः** भारतीयसमाजे, ब्रह्मचर्याश्रमः, विवाहसंस्कारः

## प्रस्तावना

मनुः प्रत्यपादयतः –

अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान्।
अनिष्ट्वा चैव यज्ञैश्च मोखमिच्छन् व्रजत्यवः।।

पञ्चमहायज्ञानाम् अनुष्ठाता गृहस्थाश्रमः सर्वेष्वाश्रमेषु श्रेष्ठो मन्यते। अयमाश्रमः सर्वेषामाश्रमाणाम् आधार एव न, आश्रमोऽपि अस्ति। अस्मादेव कारणात् आचार्य गृहस्थं 'ज्येष्ठाश्रमो' इति वदन्ति।
अस्माकं मनीषिणश्चतुरः पुरुषार्थान् व्यदधुः धर्मोऽर्थः कामो मोक्षश्चेति। एतेषां प्रयोजनं व्यक्तेः समाजस्य चोदातस्वरूपस्य सङ्कल्पनमस्ति। एतस्य चतुर्वर्गस्य समवाप्तिरेव मानवजीवनस्य लक्ष्यम्। अतो जीवनकाले धमार्थकामानां समन्वितानुष्ठामेव मानवेनोदिष्टम्। मोक्षलाभाय धर्माचरणं सुतरामपेक्षितत्वात् अस्माकं महर्षयो धर्मानुष्ठानाय दम्पती साम्मेन संयुक्तया चोत्तरदायिनौ अमन्येताम्। अत एव गृहस्थाश्रमः सर्वेष्वाश्रमेषु मुख्यं स्थानं भजते। धर्मस्य सर्वोत्तमपुरुषार्थत्वेन अभिहितत्वात् ब्रह्मचर्य वानप्रस्थ–संन्यासाख्यास्त्रय आश्रमा धर्मसाधनरूपा अजायन्त। गृहस्थाश्रम एव खल्वेवम्भूत आश्रमो यत्र मानवो निसर्गणां कामप्रवृत्तिम् अर्थपराणि कार्याणि च पूरयितुं प्रभवति। महाभारतञ्च ''गृहस्थःप्रवरस्तेषाम्'' इत्युक्त्वा गृहस्थाश्रममेव स्थले स्थले प्रशंसते–

प्रजायतेः सलोकतां बृहस्पतेः शतक्रतोः।
वदन्ति ते परां गतिं गृहस्थ धर्मसेतुभिः।।[1]

गृहस्थाश्रमे एव व्यक्ते प्रत्यक्षः सामाजिकः सम्बन्धः सम्भाव्यते। अन्येष्वाश्रमेषु प्राधान्येन मानवस्य व्यक्तिकोत्कर्ष एवं लक्ष्यते। गृहस्थाश्रमे एव सामाजिकोभ्युदयाय मानवः प्रवर्तते।

वानप्रस्था संन्यासी वा मुख्यतः आत्मीयम् आध्यात्मिकं कल्याणमेव कामयते। सांसारिकं हितचिन्तनं नितरां गौणायते। महाभारतम् एवम्भूतं पराश्रितं जनं सनाजस्य सर्वतोभावेन हितकरं न मन्यते। तदनुसारम् एकाकी जनः पुत्रः पौत्र ऋषिदेव अतिथि प्रभृतीनां भरणपोषणादि अचिन्तयन् प्रयत्नलाधवेन जीवमानः स्वार्थम् आध्यात्मिकचिन्तनं विधाय मोक्षं प्राप्तुमर्हति। परं तेन समाजस्याभीष्टो लाभो न जायते।[2] अतः अस्याश्रमस्य सामाजिकं मूल्यमेव अस्योत्कर्षे कारणभूतम्। गृहस्थस्य जीवनं ध्यानस्य कर्तव्यस्य चाविरता सरित् वर्तते यत्र निःस्वार्थसेवायाः, अनुरागस्य, स्नेहस्य, वात्सल्यस्य, सामाजिक कर्त्तव्यस्य च पीयूषधारा सततं प्रवहमाना भवति।

ऋग्वेदकालादेव गृहस्थाश्रमस्य अत्यधिकमहत्त्वं वरीवर्ति। ऋषिः इन्द्रे स्तौति यत् स सोमपात् परं गृहे गच्छेत् यत्र तस्याः कल्याणी पत्नी वर्तते–

''अपाः सोममस्तमिन्द्र प्रयाहि कल्याणीर्जाया सुरणंगृहे ते।''[3]

ऋग्वेदस्य दशमे मण्डले पञ्चविंशतितमं सूक्तं सूर्यासोमयोः विवाहस्य सकलं विधिमुपवर्णयति। तत्र नवोढ़ा वधूः उपदिश्यते यत् सा सम्प्रति गृहपत्नी वर्तते। अतः सा नूतनं गृहे गच्छेत्। तत्र प्रजापती सती गार्हपत्यं कर्मसावधानं निर्वहेत्–''गृहांगच्छ गृहपत्नी यथासो वशिनो त्वं विदशमा वदासि इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि।[4] ब्राह्मणाय उदाहरणम्, छात्रेभ्यो विद्याध्ययनार्थं सौविध्यकल्पनम् अतिथि–शिशुः गर्भिणीप्रभृतीनां परिचर्या–इयानि सकालान्यपि कार्याणि गृहस्थम् इतराश्रमिभ्यः श्रेष्ठं साधयन्ति।

गृहस्थ एव यजते गृहस्थस्तप्यते तपः।
चतुर्ण्णमाश्रगाणां तु गृहस्थस्तु विशिष्टयते।।
यथा मातत्माश्रृत्य सर्वे जीवन्तिं जन्तवः।
एव गृहस्थामाश्रित्य सर्वे जीवन्ति भिक्षवः।।[5]

मनुनाऽप्युक्तम्–

यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः।
तथा गृहस्थाश्रममास्तित्य वर्तन्ते सर्वाश्रमाः।।
अस्मात् त्रयोग्प्यश्रमिणो ज्ञानेनान्नेन चान्वहम्।
गृहस्थेनैव धार्मकते तस्मात्श्रेष्ठाश्रमी गृही।।[6]

मानवजीवनस्य लक्ष्यं पुरुषार्थचतुष्ट्यसाधानं विद्यते। तत्र धर्मो हि प्रमुखः मन्यते। अर्थकामावपि पुरुषार्थौ मन्येते। लोके त्रयोऽप्येते पुरुषार्था यद्यपि मिथो विरोधिनो भासन्ते तथापि गृहस्थाश्रमे मनुष्य एतास्त्रीनपि युगपत् सेवते। इदमैकत्रिकं सेवनमेव गृहस्थाश्रमस्य महत्त्वविधायकम् अन्यतमं कारणं वर्तते। तत्र देवार्चनम्, निश्छलं जीविकोपार्जनम्, इतरेषामाश्रमाणां सहाय्यम्, सन्तानोत्पत्त्या वंशरेखाया अविच्छिन्नतया आधानम्–इत्येतानि कर्माणि सम्पादयन् गृहस्थो धर्मेण सहैव अर्थं कामं चापि प्रपूरयति। वेदव्यासो महाभारते एतेषां परस्परविरोधिनां पुरुषार्थानां सुसमन्वयं सपत्नीके गृहस्थे एव प्रत्यपादयत्–

धर्मश्चार्थश्च कामश्च परस्पर निरोधिनः।
एषां नित्यविरूद्धानां कथमेकात्र सङ्गमः।।
यदा धर्मश्च भार्या च परस्परवशानु गौ।
तदा धर्मार्थ कामानां त्रमाणामपि सङ्गमः।।

अत एव गृहस्थस्य पार्थक्यसम्पादनेन चतुर्वर्गे अर्थकामौस्थितिरहितौ जायते।

ऋग्वेदे विवाहस्य सुप्रतिष्ठितं गौरवान्वितं च रूपं समुपलभ्यते। कान्यां पत्नीत्वेन गृह्णन्। त्वमपि पतिः कथयति भदहं सौभाग्यलाभाय त्वत्पाणिं गृह्णमि। त्वमपि पतिरूपेण मया सह परावस्थाम् अवाप्नुयाः। स्रष्ट्राः अन्यैर्देवैश्च गृहस्थाश्रमम् अनुष्ठातुं मह्यं प्रदत्तऽसि। उक्तं यथा–

''ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या परदष्टिर्यथासः।
भमो अर्यया सविता पुरन्धिर्मह्यं त्वादुर्भार्हपत्याय देवाः।।''[7]

दम्पती तयोरेव एकहृदयत्वं प्रतिपादयन्तौ देवान् उपस्थितान् सभ्यांश्च प्रत्यायतः यत् तयोर्हृदये जलमिव सम्मिलिते स्तः। यथा प्राणाः प्रेयांसो भवन्ति तद्वत् तावपि परस्परं प्रसादयुतौ स्थास्यतः। जगद्धारका इव तौ अन्योऽन्यं धारयिष्यतः। श्रोतृभिः सार्धं वक्तुं प्रीतिरिव तौ पारस्परिकम् अवच्छिन्नं प्रेमधारयिष्यतः –

''ॐ समञ्जन्तु विश्वेदेवाः समक्षो हृदयानि नौ।
सं मातरिश्वा सं धाता समुदेष्ट्री दधातु नौ।।''[8]

नैके विद्वांसो वेदेषु ब्राह्मणेषु उत्तरवर्तिने संस्कृतसाहित्ये चोपलभ्यमानानि उपाख्यानानि आश्रित्य वैवाहिकस्यापनायाः प्राक्मुक्तकामाचारात्मिकां स्थितिं प्रतिपादयन्ति। ते अग्निपूष्णोः वर्णनं गमयमीसंवादम्, प्रजापति– तद्दुहित्रभिमर्थनाख्यानं च पुरस्कुर्वन्ति। परम् एभिरूदाहरणैः प्राप्तो निष्कर्षोऽयं नोचितः, यतोहि वैदिकानाम् आख्यानानां भाषायां प्रतीकात्मकताया बाहुल्य दृग्गोचरीभवति। तेषु स्वसृपदं स्वयंवरणकर्त्र्याः, जारपदं जरयितुः दुहितृपदं च दोग्धव्याया वाचकत्वात् भगिन्या पुत्र्या च सह कामाचारस्य कल्पनामेव निरस्यन्ति। यान् देवान् अवलम्ब्य एतदाख्यातम् तेषां स्वरूपविवेचनादेव कामाचारसन्दर्भो व्यावर्तितो भवति। अस्मिन् सन्दर्भे डॉ. मैक्समूलरमहोदयस्य कथनमिदमुद्धर्तुं शक्यते–''वैदिककाले'' पदानामर्था रूदतां नागच्छन्। तानि द्रवावस्थायामासन् अतः स्वासादुहित्रोः अपि रूखर्थाः कथमपि स्वीकर्तुं न शक्यन्ते। आदिपर्वणि

कुन्तीं वियोगाय अभिप्रेरयन् पाण्डुः पुराकाले कुरूवंशकाले चापि स्त्रीणां कामचारतां वर्णयति—

अनावृताः किल पुरा स्त्रिय आसन् वरानने।
कामचारविहारिण्यः स्वतन्त्राश्चारूद्वासिनी।।
तासां त्युच्चरमाणानां कौमारात् सुभगे पतीन्।
नाऽधर्मोऽभूद्वराराहे स हि धर्मः पुराऽभवत्।
उत्तरेषु च रम्भोरू कुरुष्वद्यापि वर्तते।।[9]

कर्णपर्वणि शल्यवचनैरवमानितः कर्णो मद्रदेशेऽपि स्त्रीणां कामचारतां सङ्केतयति—

वासांस्युत्सृज्य नृत्यन्ति स्त्रियो मा मद्यमोहिताः।
मैथुनेऽसंयमाश्चापि यथाकामचराश्च ताः।।[10]

उपर्युक्ता उर्मप्रसङ्गा कदाचिद् अंशतः सत्याः स्युः, किन्तु कथमपि ते कामाचाराद् विवाहसंस्कारस्योद्भवं न साधयन्ति। वेदव्यासो वाल्मीकिश्च बहुषु स्थलेषु प्रत्यपादयतां यत् विवाहः सामान्यः स्वाभाविकाश्च संस्कारो यः खलु सुसंस्कृते सभ्ये च समाजे लक्ष्यते।[11] यो हि समाजो नियमरहितोऽव्यवस्थितोऽराजकश्च स्यात्। तत्रैव विहास्य मर्यादा न सम्भाव्यते—

''न विवाहाः समाजो वा यदि राजा न पालयेत्।''[12]

अस्मिन् संसारे पितरः, देवाः, मानवाः, कीटाः, पतङ्गाः पशु पक्षिणो जीवाः अर्थात् यावदपि प्राणिजगत् वर्तते, तत्सर्व गृहस्थद्वारैव पाल्यते पोष्यते च। सदगृहस्थः प्रतिदिनं पञ्चयज्ञानामनुष्ठानेन, श्राद्धतर्पणविधानेन, यज्ञदानादिभिः, अतिथिसत्कारेण च सर्वान् बिभर्ति, पुष्णाति च।

शास्त्रानि वदन्ति यन्मानवः सर्वेभ्योऽन्नजलादिकं प्रदायैव स्वयमन्नजलं गृह्णीयात्। एतस्मिन्नेव मानवस्य मङ्गलमस्ति। तदर्थमेव शास्त्रकाराः तर्पणस्य बलिवैश्वदेवस्य च विधानं कृतवन्तः। गृहस्थो यदि श्रौतविधिनाऽथवा स्मार्तविधिना वा प्रतिदिनमग्निहोत्रं कर्तुं न शक्नुयात् तर्हि स बलिवैश्वदेवं त्ववश्यमेव कुर्यात्। बलिवैश्वदेवेन समस्तविश्वस्य कृते बलिप्रदानम् अभिप्रेतम्। वस्तुतः बलिवैश्वदेवस्य अनुष्ठानेऽग्नौ याऽऽहुतिः समर्प्यते, तामाहुतिं सूर्यः प्राप्नोति। ततः सूर्यद्वारा वृष्टिरूपे परिणतां तामाहुतिं सम्पूर्णजगतः प्राणिनः प्राप्नुवन्ति। अतः बलिवैश्वदेवस्य विधानमित्युच्यते सम्पूर्णजगत उज्जीवनं मन्यते। यथोक्तम् सायम्प्रातः सिद्धस्य हविष्यस्य जुहुयात्।

इत्थं वयं पश्यामो यत् संस्काराणां मध्ये विवाहस्यात्यन्तमेव महत्त्वपूर्ण स्थानं वर्तते। वैदिकसाहित्ये विवाहोऽप्येको यज्ञ एव मन्यते। अत एव विवाहं सम्पाद्य गृहस्थजीवने प्रवेश आवश्यको मन्यते। तदभावे मानवोक्यज्ञियो यज्ञहीनो वाऽभिधीयते। तैत्तिरीयब्राह्मणे स्पष्टतया लिखितम्—

''अयज्ञियो वा एष योऽपत्नीकः 'इति'[13] एवमेव ऋण त्रयान्मुक्तिः विवाहं विनाऽसम्भवा वर्तते। स्मृतय आश्रमव्यवस्थां पूर्णतया समर्थयन्ति। ता दृढ़ं प्रपिपादयन्ति यद् ब्रह्मचर्याश्रमानन्तरम् अनिवार्यरूपेण विवाहो विधीयेत इति।''

चतुर्थमायुषो भागं वसित्वाद्य गुरोः कुले।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत्।।
वनेषु च विहृत्यैव तृतीयं भागमायुषः।
चतुर्थमायुषो भागं त्यक्त्वा सङ्काम परिव्रजेत्।।[14]

विवाहशब्दस्य तात्पर्यं स्त्रीपुरुषयोः सम्बन्धमात्रेणैव नास्ति अपितु तत्पश्चात् जातस्य शिशोः जायायाश्च रक्षणम् गार्हस्थ्यजीवनस्य आवश्यकता, पारिवारिक— जीवनस्य आदर्शश्च निहितो वर्तते।

'विवाह' शब्दस्य व्युत्पत्तिः 'वि' उपसर्गपूर्वक 'वह' प्रापणे धातोः धम् प्रत्ययात् जायते। धर्मशास्त्रे विवाहस्यानेके समानार्थकाः शब्दाः लभ्यन्ते। यथा—उद्वाहः, परिणयः, पाणिग्रहणं स्वीकारणम्, उपयमश्चेत्यादयः। तत्र वहनमेव वाहः। विशिष्टो वाहो विवाह उच्यते। किमत्र वैशिष्ट्यम् प्रतिग्रहादिषु अष्टविधोपायेषु अन्यतमेनोपायेन स्वीकृतानां येषामादिसप्तपद्यन्तानां कार्मणां संस्कृततत्वमेव तत्र वैशिष्ट्यम्।

विवाहसंस्कारस्य अभीष्टताम्, अनिवार्यता, महिमानं च वीक्ष्य प्रश्नोऽयं स्वभावत उदेति यत् को नाम विवाहः, अस्य प्रश्नस्य विचारप्रसङ्गे विविधः शङ्काः समक्षमायान्तियत् विवाहे नाम—

1. कामाश्रिता काचनं मर्यादा।
2. पुत्राभिलाषेण विहितः पुंस्त्रीसम्बन्धः।
3. उपर्युक्तं सम्बन्धं निवौदुभ् अपेक्षितं बाह्यबन्धनमात्रम्।
4. स्त्रीपुंसो वास्तविकं तादात्म्यम्।

**निष्कर्षः** — संस्कृतस्य विविधग्रन्थेषु गृह्यसूत्रेषु च विवाहविधिः विशदमुपवर्णितो वर्तते। वस्तुतः सूत्रकाले एव विवाहविधिः क्रमबद्धोऽभवत्। प्रत्येकं गृह्यसूत्रं किमपि भिन्नभिन्नं विवरणं प्रस्तौति। वैदिकसम्प्रदायानां भिन्नभिन्नानि गृह्यसूत्राण्येव तत्र कारणीभूतानि लक्ष्यन्ते। तथापि तेषु कोऽपि तात्त्विकभेदो नास्ति। तेषु प्रायः समाना एव वैदिकचर्याः वैवाहिकप्रथाश्च अनुसृताः सन्ति। उपर्युक्तवर्णनेन सिद्धयति यत् मानवजीवने विवाहसंस्कारस्य पुरूषार्थचतुष्टयसाधकं महत्त्वपूर्णञ्च स्थानं विद्यते।

**संदर्भाः —**

1. महा. 12/309/60।
2. तत्रैव—12/10/22।
3. ऋ.वे. 3/5/3/7।

4. व.ध.–8/3/14–16।
5. म.स्मृ.–3/77–78।
6. तत्रैव–10/85/26/27।
7. ऋ.वे.–10/85/36।
8. ऋ.वे.–10/85/47।
9. महा. 1/113/4–7।
10. महा. 8/27/85।
11. हिन्दू विवाह मीमांसा, पृ. 20।
12. महा. 12/68/22।
13. तै. ब्रा.–2/2/2/13।
14. मनुस्मृति–4/1–2।